## अध्याय :- ५० chapter-50

अतिथिरुवाच ।।[१]
साध्वबालमते बाल कमठे तत्त्वयोऽच्यते ।।
शरीरलक्षणं श्रोतुं पुनरिच्छामि तद्वद ।। १

कमठ [२]उवाच ।।
यथैवेद ब्रह्मांडं शरीरं च [३]तथा श्रृणु ।।
पादमूलं च पातालं प्रपदं च रसातलम् ।। २

तलातलं तथा गुल्फौ जंघे चास्य महातलम् ।।
जानुनी सुतलं चोरू वितलं ~~सकलं~~ च चातलं कटिम्[४] ।। ३

नाभिं महीतलं प्राहुर्भुवर्लोकमथो दरम् ।।
उरः स्थलं च स्वर्लोकं महर्ग्रीवा मुखं जनम् ।। ४

नेत्रे तपः सत्यलोकं शीर्षदेशं वदंति च ।।
तद्यथा सप्त द्वीपानि पृथिव्यां संस्थितानि च ।। ५

तथात्र धातवः सप्त नाम तस्तान्निबोध मे ।।
त्वगसृङ् मांस मेदोऽस्थिमज्जा शुक्राणि धातवः ।। ६

अस्थ्नामत्र शतानि स्युस्त्रीणि षष्ट्यधिकानि च ।।
त्रिंशच्छतसहस्त्राणि नाडीनां कथितानि च ।। ७

---

१ अ. अतिथिरु ।। ब. अतिथि उ० ।।
२ अ. प्रती 'कमठ' नास्ति ।
३ ब. तथोच्यते ।।
४ अ. प्रती 'स्मृतं' इति स्यात् ।

षट्पंचाशत्सहस्त्राणि तथान्यानि नवैव तु ।।
ता वहंति रसं देहे जलं नद्यो यथा भुवि ।। ८

सार्धाभिस्ति सृभिश्छन्नं समंताद्रोम कोटिभिः ।।
शरीरं स्थूल सूक्ष्माभिर्दश्यादश्या हितत्वः स्मृताः[१] ।। ९

षडंगानि प्रधानानि कथ्यमानानि मे श्रृणु ।।
द्वौ बाहू सक्थिनी[२] द्वे च मूर्धा जठरमेव च ।। १०

अंत्राण्यत्र तथा त्रीणि सार्धव्यामत्रयाणि च ।।
त्रिव्यामानि[३] तथा स्त्रीणामाहुर्वेदविदो द्विजाः[४] ।। ११

ऊर्ध्वं नालमधोवक्त्रं ह्रदि पद्मं प्रकीर्त्यते ।।
ह्रत्पद्मवामतः पीलहा दक्षिणे स्यात्तथा यकृत ।। १२

मज्जातो मेदसश्चैव वसायाश्च तथा द्विज ।।
मूत्रस्य चैव पित्तस्य श्लेष्मणः ~~[illegible]~~ शकृतस्था ।। १३

रक्तस्य चरमस्यात्र गर्ता द्वयंजलयः स्मृताः ।।
तेभ्यः प्रवर्तमानास्ते ~~देह~~ देहं संधारयंत्युत ।। १४

---

१ ब. स्मृता
२ अ. शक्थिनी
३ अ. ..... णि
४ ब. द्विजा।

सीवमन्यश्च[1] तथा सप्त पंच मूर्धनिमास्थिताः ।।
[2]एका मेढ्रं गता चैका तथा जिह्वां गता द्विज ।। १५

नाडयः सर्वाः प्रवर्तंते नाभिपद्मात्तथात्र च ।।
यासां श्रेष्ठा[3] शिरो याता सुषुम्नेडाऽथ पिंगला ।। १६

नासिकाद्वारमासाद्य संस्थिते देहवर्धने ।।
वायुरग्निश्चंद्रमाश्च पंचधा पंचधात्र च ।। १७

प्राणापान समानाश्च उदानोव्यान एव च ।।
पंच भेदाः स्मृता वायोः कर्माण्येषां वदंति च ।। १८

उच्छ्वासश्चैव निःश्वासो[4] ह्यन्नपान प्रवेशनम् ।।
आकंठाच्छीर्ष संस्थास्य प्राणकर्म प्रकीर्तितम् ।। १९

त्यागो विण्मूत्र शुक्राणां[5] गर्भविस्त्रवणं तथा ।।
अपानकर्म निर्दिष्टं स्थानमस्य गुदोपरि ।। २०

समानोधारयत्यन्नं विवेचयति चाप्यथ ।।
रसश्चैव चरति सर्वश्रोणिष्ववारितः ।। २१

---

१ अ. सावन्यश्च

२ ब. एके मेढ्रे

३ अ. श्रेष्टा

४ ब. निश्वासौ

५ अ. शुक्राणां

वाकप्रवृत्ति प्रदोद्गारे प्रयत्ने सर्व कर्मणाम् ।।
आकंठ सुर संस्थान मुदानस्य प्रकीर्त्यति ।। २२

व्यानो त्हदि स्थतो नित्यं तथा देहचरोपि च ।।
धातुवृद्धिप्रदः स्वेदलालोन्मेष निमेष कृत ।। २३

पाचको[१] रजकश्चैव साधकालोचको तथा ।।
भ्राजकश्च तथा देहे पंचधा पावकः[१] स्थितः ।। २४

पाचकस्तु[३] पचत्यन्नं नित्यं पक्वाशये स्थितः ।।
आमाशयस्थोऽपि रसं रंजकः कुरुते त्वसृक् ।। २५

साधको त्हदि संस्थश्च बुद्ध्याद्युत्साह कारकः ।।
आलोचकश्च दकसंस्थो रूप दर्शन शक्तिकृत् ।। २६

त्वक संस्थो भ्राजको देहं भ्राजयेन्निर्मलीकृतः ।।
क्लेदको[४] बोधकश्चैव तर्पणाश्च[५] श्लेषमणस्तथा ।। २७

आलंबकस्तथा देहे पंचधा सौम उच्यते ।।
क्लेदकः क्लेदयत्यन्नं नित्यं पक्वाशये स्थितः ।। २८

---

१ अ. पावको

२ अ. पातकः

३ अ. पावकस्तु

४ ब. क्लेशको

५ ब. तर्पण

बोधकी रसनास्थश्च रसानामव बोधकः ।।
शिरःस्थश्चक्षुरादीनां तर्पणात्तर्पणः स्मृतः ।। २९

सर्वसंधि गतश्चैव श्लेष्मणः श्लेष्मकृत्तथा ।।
उरःस्थः सर्वगात्राणि स वै हृयालंबकः स्थितः ।। ३०

एवं वाटवग्नि सोमैश्च देहः संधारितस्त्वसै ।।
आकाशजानि स्त्रोतांसि[1] तथा कोष्ठविविक्तता ।। ३१

पार्थिवानिह[2] जानीहि घ्राणकेशनखानि च ।।
अस्थीनि[3] धैर्य गुरुता त्वङ मांसं त्ददयं गुदम् ।। ३२

नाभिर्मेदो यकृन्मज्जा अंत्रमामाशयः शिरा ।।
स्नायुः पक्वाशयश्चैव प्राहुर्वेद विदो द्विजाः ।। ३३

नेत्रयोर्मण्डलं शुक्लं[4] कफाद्भवति पैतृकम् ।।
कृष्णं च मण्डलं वातात्तथा भवति मातृकम् ।। ३४

पक्ष्ममण्डलमेकं तु द्वितीयं चर्ममण्डलम् ।।
शुक्लं[5] तृतीयं कथितं चतुर्थं कृष्ण मण्डलम् ।। ३५

---

१ अ. श्रोतांसि
२ ब. पार्थवामिहि
३ ब. अस्थिनि
४ अ. शुक्लं
५ अ. शुक्लं

दडमखडलम् पंचमं तु नेत्रं स्यात्पंच मण्डलम् ।।
अपरे नेत्रभागे द्वे उपांगौऽपांग एव च ।। ३६

उपांगौ नेत्रपर्यंतौ नासामूलम पांगकः[1] ।।
वृषणौ च तथा प्रोक्तौ मेदो सृक्कफ मांसकौ ।। ३७

असृङ् मांसमयी जिह्वा सर्वेषामिव देहिनाम् ।।
हस्तयो रोष्ठयोर्मेढ्रे ग्रीवायां षट् च कूर्चकाः[2] ।। ३८

एवमत्र स्थिते जीवो देहेऽस्मिन्सप्त सप्तके ।।
पंचविंशतिको व्याप्य देहं वासोऽस्य मूर्धनि ।। ३९

त्वगसृग्मांसमित्याहुस्त्रिकं मातृसमुद्भवम् ।।
मेदो मज्जास्थिकं प्रोक्तं पितृजं[3] षट् च कौशिकम् ।। ४०

एवं भूतमयं देहं पंचभूत समुद्भवैः ।।
अन्नैर्यथा वृद्धिमेति तदहं वर्णयामि ते ।। ४१

तदन्नं पिण्डकवलैर्ग्रासैर्भुक्तं च देहिभिः ।।
पूर्वं स्थूलाशये वायुः प्राणः प्रकुरुते द्विधा ।। ४२

---

१ ब. पांगतः
२ अ. कूर्पताः
३ ब. प्रती एतत्स्थाने 'बद्ध' इति स्यात्

संप्रविश्यान्नमध्ये तु पृथगन्नं पृथग्जलम् ।।
अग्नेरूर्ध्वं जलं स्थाप्य तदन्नं तज्जलोपरि ।। ४३

जल स्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः ।।
वायुना धम्यमानोग्निरत्युष्णं कुरुते जलम् ।। ४४

द्विधा भवति तत्पक्वं पृथक्किट्टं पृथग्रसम् ।। ४५

मलैर्द्वादशभिः किट्टं[1] भिन्नं देहाद्बहिर्व्रजेत् ।।
कर्णाक्षि नासिका जिह्वा दंताः शिश्नं[2] गुदं नखाः ।। ४६

रोम कूपाणि[3] चैव स्युर्द्वादशैति मलाश्रयाः ।।
त्दत्पद्मप्रति बद्धाश्च सर्वा नाडयः समंततः ।। ४७

तासां मुखेषु तं सूक्ष्मं व्यानः स्थापयते रसम् ।।
रसेन तेन ता नाडीः समानः पूरयेत्पुनः ।। ४८

ततः प्रयांति संपूर्णास्ताश्च देहं समंततः ।।
ततः स नाडिमध्यस्थो रंजकेनोष्मणा रसः ।। ४९

---

१ अ., ब., कीटं
२ अ. शश्नं
३ अ. कुपानि

पच्यते पच्यमानस्तु रुधिरत्वं भजेत्पुनः ।।
ततस्त्वग्लोम केशाश्च मांसं स्नायुशिरास्थि[1] च ।। ५०

नखा मज्जा स्वैमल्यं शुक्र[2]वृद्धिः क्रमाद्भवेत् ।।
एवं द्वादशधान्नस्य परिणामः प्रकीर्त्यते ।। ५१

एतमेतद्विनिष्पन्नं शरीरं पुण्य हेतवे ।।
यथैव स्यंदनः शुभ्रो[3] भार संवाहनाय च ।। ५२

तैलाभ्यंगादिभिर्यत्नैर्बहुभिः पाल्यते न चेत्[4] ।।
किं कृत्यं साध्यते तेन यदिभारं वहेन्न हि ।। ५३

एवमेतेन देहेन किं कृत्यं भोजनोत्तमैः ।।
वर्धितेन न चेत्पुण्यं कुरुते पशुवच्च तत् ।। ५४

भवंतिचात्र श्लोकाः ।।
यस्मिन्काले च देशे च वयसा यादृशेन च ।।
कृतं शुभाशुभं कर्म तत्तथा तेन भुज्यते ।। ५५

तस्मात्सदा शुभं कार्यमविच्छिन्न सुखार्थिभिः ।।
विच्छिद्यंते ऽन्यथा[5] भोगा ग्रीष्मे कुसरितो यथा ।। ५६

---

१ ब. शरास्थि
२ ब अ. शुक
३ अ. ब. शुभ्रौ
४ अ. प्रतौ वा इति स्यात् ।
५ अ. विविधं ते ऽन्यथा

यस्मात्पापेन[1] दुःखानि तीव्राणी सुबहून्यपि ।।
तस्मात्पापं न कर्तव्यमात्मपीडाकरं हि तत् ।। ५७

एवं ते वर्णितः साधो प्रश्नो/यं शक्तितोमया ।।
यथा संजायते प्राणी यथा शृणु प्रलीयते ।। ५८

आयुष्ये कर्मणि क्षीणे संप्राप्ते मरणे नृणाम् ।।
स्वकर्मवशगो देही कृष्यते यम किंकरैः ।। ५९

पंचतन्मात्र सर्कर्म सहितः समनोबुद्धयहं कृतिः[2] ।।
पुण्यपापमयैः पाशैर्बद्धो जीवस्त्यजेद्वपुः ।। ६०

तत्क्षणात्सो/थ गृह्णाति शारीरं चातिवाहिकम् ।।
अंगुष्ठपर्वमात्रं[3] तु स्वप्राणैरेव[4] निर्मितम् ।। ६१

अधश्र्व पापिनां याति योगिनां ब्रह्मरंध्रतः ।। ६२

ततस्तस्मिन्स्थितं जीवं देहे यमभटास्तदा ।।
बद्धा नयंति मार्गेण याम्येनाति यथा बलम् ।। ६३

---

१ ब. तस्मात्पापेन
२ ब. कृति
३ अ. अंगुष्ट...
४ अ. रवि

तप्तांबरीष कुंड तुल्येन अयोगुड निभेन च ।।
प्रतप्तसिकते नापि ताम्रपात्र[1] निभेन च ।। ६४

षड शीति सहस्त्राणि योजनानां महीतलात् ।।
कृष्यमाणो यमपुरीं नीयते पापकृद्भटैः ।। ६५

क्वचिच्छीतं महादुर्गमन्धकारं क्वचिन्महत् ।।
अग्नि संस्पर्श वदनैः[2] काककाकोलजंबुकैः[3] ।। ६६

मक्षिकादंशमशकैर्भक्ष्यते सर्पवृश्चिकैः ।।
भक्ष्यमाणोऽपि तैर्जंतुः क्रंदते म्रियते न हि ।। ६७

क्वचिच्च भक्ष्यते घोरै राक्षसैः कृष्यतेऽस्यते ।।
दह्यमानोति घोरेण सैकतेन च नीयते ।। ६८

मुहूर्तैर्दशभिर्याति तं मार्गमति दुस्तरम् ।।
तं कालं सुमहद्वेत्ति पुरुषो वर्षसंमतिम् ।। ६९

तार्यते[4] च नदीं घोरां पूयशोणितवाहिनीम् ।।
नदीं वैतरणीं नाम केशशैवल शाद्वलाम् ।। ७०

---

१ अ. पत्र
२ ब. बत्र वदने
३ ब. जंबुकै
४ अ. हार्यते

ततो यमस्य पुरतः स्थाप्यते यम किंकरैः ।।
पापी महाभयं पश्येत्कालांतकमुखैर्वृतम् ।। ७१

पुण्यकर्मा सौम्यरूपं धर्मराजं तदा किल ।।
मनुष्या एव गच्छंति यमलोकं न चापरे ।। ७२

मरणानंतरं तेषां जंतूनां योनि पूरणम् ।।
तथा हि प्रेता मनुजाः श्रूयंते नान्यजंतवः ।। ७३

धार्मिकः पूज्यते तत्र पापः पाशगलोभवेत् ।।
धार्मिकश्च यथा याति तं मार्गं श्रृणु वच्मि ते[1] ।। ७४

आरामद्रुमदा[2] तारः फलपुष्पवतां पथा[3] ।।
छायया च सुखं यांति तथा ये च्छत्रदा नराः ।। ७५

उपानहप्रदा यानैर्वितृष्णाः पूर्तधर्मिणः ।।
विमानैर्यानदा यांति तथा शय्यासनप्रदाः ।। ७६

भक्ष्य भोज्यैस्तथा तृप्ता यांति भोजनदायिनः ।।
दीप प्रदाः प्रकाशेन गोप्रदास्तां नदीं सुखम् ।। ७७

---

१ अ. प्रतौ श्रृणु नास्ति ।
२ ब. आरोम
३ ब. यथा

श्री सूर्यं श्री महादेवं भक्ता ये पुरुषोत्तमम् ।।
जन्मप्रभृति [1]ते यांति पूज्यमाना यमानुगैः ।। ७८

महीं गां कांचनं वस्त्रं लोहं तिलान्कार्पासमेव च ।।
लवणं सप्तधान्यं च दत्वा याति सुखं नरः ।। ७९

तेषां तत्र गतानां च पापिनां पुण्यकर्मिणाम् ।।
चित्रगुप्तः प्रेतपाय[2] निरूपयति तैः ततः ।। ८०

प्रेतलोके स[3] वसति ततः संवत्सरं नरः ।।
वत्सरेण च तेनास्य शरीरमभिजायते ।। ८१

सोदकुम्भमथान्नाद्यं बांधवैर्यत्प्रदीयते ।।
दिने दिने स तद्भुक्त्वा तेन वृद्धिं प्रयाति च ।। ८२

पूर्वदत्तमथान्नाद्यं प्राप्नोति स्वयमेव च ।।
स्वयं येन न दत्तं च तथा दाता न विद्यते ।। ८३

न चाप्युदकदातासौ क्षुत्तृड्भ्यामति पीडयते ।।
बांधवैस्तूदकं दत्तं नदीभूत्वोपतिष्ठिति ।। ८४

---

१ अ. प्रतौ संयाति इति पाठः ।
२ ब. प्रेतयोनि
३ ब. च पाठः ।

मासिमासि च यच्छ्राद्धं षोडशश्राद्ध पूर्वकम् ।।
अत्र[1] न क्रियते यस्य प्रेतत्वात्स न मुच्यते ।। ९५

मानुषेण दिने नैव प्रेतलोके दिनं स्मृतम् ।।
तस्माद्दिने दिने देयं प्रतायान्नं च वत्सरम् ।। ८६

तं च स्माशानिकानाम गणा याम्या भयावहाः ।।
शीतवातातपोपेतं तत्र रक्षंति पापिनम् ।। ८७

यथेह[2] बन्धने कश्चिद्रक्ष्यते विषमैर्नरैः ।।
प्रेतपिंडा न दीयंते षोडशश्राद्ध पूर्वकाः ।। ८८

यस्य तस्य न मोक्षोऽस्ति प्रेतत्वाद्धि युगैरपि ।।
ततः सपिण्डीकरणे बांधवैः सुकृते नरः ।। ८९

पूर्णे संवत्सरे देहं संपूर्णं प्रतिपद्यते ।।
पापात्मा घोररूपं तु धार्मिको दिव्यमुत्तमम् ।। ९०

ततः स नरकं याति स्वर्गं वा स्वेन कर्मणा ।।
रौरवाद्याश्च नरकाः पातालतलसंस्थिताः ।। ९१

---

१ अ. ब. ( तत्र

२ अ. मादेह । ब. य देहं ।

सुराद्याः सत्यपर्यंताः स्वर्लोके स्योर्ध्वमाश्रिताः ।।
इतिहासपुराणेषु वेद स्मृतिषु यच्छ्रुतम् ।। ९२

पुण्यं तेन भवेत्स्वर्गो नरकस्तद्विपर्ययात् ।।
तत्रापि कालवसति कर्मणा मनुरूपतः ।। ९३
अर्वाक्सपिंडी करणं यस्य वर्षाच्च वा कृतम् ।।
~~अर्वाक्सपिंडी~~ प्रेतलोके तस्यापि प्रोक्तं संवत्सरं ध्रुवम् ।। ९४
यैरिष्टं च त्रिभिर्मेधैरर्चितं वा सुरत्रयम् ।।
प्रेतलोकं न ते यांति तथा ये समरे हताः ।। ९५

शुद्धेन[2] पुण्येन ~~ऊर्ध्वं~~ दिवं च शुद्धा[3] पापेन शुद्धेन[4] तथा तमोघम् ।।
मिश्रेण स्वर्गं नरकं च याति देहस्तथैवास्य भवेच्च तादृक ।। ९६

प्रश्नत्रयं चेति तव[5] प्रणीतमुत्पत्ति मृत्यू पर लोक वासः ।।
यथा गुरुर्मे समुदाजहार किं भूय इच्छस्युत तद्वदामि ।। ९७

*६ इति श्री स्कांदे........आदित्य कमठ संवादे जीवस्य पारलौकिक
—गत्यादि वर्णनं नाम पंचाशत्तमोऽध्यायः ।।५० ।।

---

१ अ. काले
२ अ. श्रुद्धेन
३ अ. ब. शुद्धं
४ अ. श्रुद्धेन
५ ब. नव
*६ अ. इति श्री स्कंद पुराण ।
ब. इति श्री स्कंद पुराणे कुमारिकाखंडे पंचशोऽध्यायः ।।५०।।